Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ बृहस्पतिमन्त्र उच्यते —

ब्रह्माऽनुष्टुप् बृहस्पतयो ऋष्याद्याः । ब्रां हृत् । ब्रीं शिरः । इत्याद्यङ्गम् । ब्रं बृहस्पतये नमः ॥ इति मन्त्रः । अष्टसहस्रं जपेत् । सर्पिस्सिक्तेनान्नेन दशांशं पुरश्चरणाहोमः । पूजायामङ्गेन्द्रवज्रादिभिरावरणत्रयम्॥ ध्यानम् —

रत्नस्वर्णांशुकादीन् निजकरकमलाद्दक्षिणादाकिरन्तं
वासोराशौ निधायापरममरगुरुं पीतवस्त्रादिभूषम् ।
ध्यायन्नासीनमप्यापणभुवि शतसंख्यं सविंशत्कमेवं
भीतापुष्पैर्घृताक्तैस्त्रिदिनमथ हुनेत्स्वर्णवस्त्रादिसिध्यै ॥

अयमर्थः — एवंरूपं बृहस्पतिं ध्यात्वा घृतसिक्तैर्भीतापुष्पैः विंशत्युत्तरशतसंख्यं त्रिदिनं हुनेत् स्वर्णादिसिध्यै । भीतापुष्पं लज्जालुकाप्रसूनं (தொட்டாச்சிணுங்கிப்பூ) इति सत्संप्रदायसर्वस्वे उक्तम् ॥

प्रयोगान्तरम्—

गुरोर्वारे तथा विद्वान सौम्ये चाथ विशेषतः।
घृतमिश्रैः प्रसूनैस्तु जुहुयाद्वै शतत्रयम् ॥

यथावर्णं प्रसूनं वै तद्वर्णं वस्त्रमाप्नुयात्।
सोमवारदिने पूर्वं. पूजां कृत्वा विनायके ॥

आसीनोदङ्मुखो मन्त्री मन्त्रमष्टशतं जपेत्।
जपान्ते क्षीरहोमी स्यात्तदर्धं वै पुनः पुनः ॥

तच्छेषं प्राशयेद्विद्वान् वाङ्नदीवेगवान् भवेत्।
वटवृक्षस्य मूलेऽस्मिन्नासीनः प्राङ्मुखः शुचिः ॥

सायं प्रातर्जपेन्मन्त्री मन्त्रमष्टशतं क्रमात्।
सप्ताहं वाथ पक्षाहं यथाविधि समाहितः ॥

जपान्ते तर्पणं होमं सतिलैर्घृतसंयुतम्।
तच्छेषं प्राशयेद्विद्वान् वाङ्नदीवेगवान् भवेत् ॥

भानुपुष्पं समादाय तीक्ष्णतैलेन मिश्रितम्।
द्विरात्रं होमयेन्मन्त्री मन्त्रमष्टशतं जपेत् ॥

उच्चाटनमिदं साक्षादरेस्तस्य न संशयः।

भानुपुष्पं – रुचीचेंफूल எருக்கம்பூ तीक्ष्णतैलं—मोहरयाचेंतेल
கடுகு எண்ணெ